# Brahmana Kritam Krishnanarayama Stotram

# બ્રહ્મણા કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Brahmana Kritam Krishnanarayama Stotram

File name : brahmaNAkRRitaMkRRiShNanArAyaNastotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 581/10-20||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# બ્રહ્મણા કૃતં કૃષ્ણનારાયણસ્તોત્રમ્

નીલાચલેન મહતા પર્વતેન વિરાજિતમ્ ।
સૃષ્ટ્વા ચરાચરં બ્રહ્મા ચિન્તયામાસ વૈ પુરા ॥ ૧૦॥

દેહિનાં મોક્ષણાર્થં વૈ વિષ્ણું સ્તોષ્યે પરેશ્વરમ્ ।
અહં તુ મમ મોક્ષાર્થં ભજિષ્યે પુરુષોત્તમમ્ ॥ ૧૧॥

વિચાર્યેત્થં પ્રતુષ્ટાવાઽનાદિશ્રીકૃષ્ણમચ્યુતમ્ ।
ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને નમઃ ॥ ૧૨॥

અક્ષરેશાય મુક્તાનામધિપાય નમો નમઃ ।
રાધાલક્ષ્મીપ્રભાહંસામાણિકીશાય તે નમઃ ॥ ૧૩॥

પાર્વતીશાય સગુણામઞ્જુલેશાય તે નમઃ ।
શ્રીકૃષ્ણસ્ત્વં પરબ્રહ્મ નારાયણસ્ત્વમેવ ચ ॥ ૧૪॥

ભૂમા વિષ્ણુર્મહાવિષ્ણુર્વૈરાજસ્ત્વં પ્રવર્તસે ।
અન્તર્યામી પ્રકાશશ્ચ ગોચરોઽગોચરસ્તથા ॥ ૧૫॥

તત્ત્વાત્મકશ્ચ પ્રકૃતિવિકૃતિજ્ઞસ્ત્વમેવ ચ ।
કોશસંસ્થશ્ચાણુસૂક્ષ્મો મહીયાન્મહતાં ભવાન્ ॥ ૧૬॥

દ્રવ્યં ગુણશ્ચ કર્મ ત્વં ભાવોઽભાવસ્ત્વમેવ ચ ।
માયા ચ કારણં કાર્યં ત્વમેવાઽસિ નમોઽસ્તુ તે ॥ ૧૭॥

સંસારે ત્વાત્મલુબ્ધાનાં સારમાત્મા ત્વમેવ ચ ।
અસારશ્ચાપિ તે દૃષ્ટ્યા સારરૂપઃ પ્રજાયતે ॥ ૧૮॥

સોઽહં રાગં પરિત્યજ્ય ભવિષ્યે ત્વાં પરેશ્વરમ્ ।
કિમસારસ્વરૂપાણાં તુષાણામયઘાતનાત્ ॥ ૧૯॥

યત્ર ચાન્તે ભવેચ્છૂન્યં તન્નારભેત બુદ્ધિમાન્ ।
મયા સૃષ્ટિઃ શૂન્યકાન્તા કર્તવ્યા નૈવ કેશવ ॥ ૨૦॥

પ્રસીદાઽદ્ય પ્રમોક્ષં ચ પ્રદેહિ મમ ચેચ્છતઃ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૮૧-અધ્યાયાન્તર્ગતં
બ્રહ્મણા કૃતં કૃષ્ણનારાયમસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૮૧/૧૦-૨૦ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 581/10-20..

Proofread by PSA Easwaran

---

*Brahmana Kritam Krishnanarayama Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*